# सुन्दरकाण्ड द्विचत्वारिंशः सर्गः (४२) - ॥ किङ्कर वधः ॥

ततः पक्षि निनादेन वृक्ष भङ्ग स्वनेन च ।
बभूवुस् त्रास सम्भ्रान्ताः सर्वे लङ्का निवासिनः ॥ १ ॥

विद्रुताश्च भयत्रस्ता विनेदुर् मृगपक्षिणः ।
रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥ २ ॥

ततो गतायां निद्रायां राक्षस्यो विकृताननाः ।
तद्वनं ददृशुर् भग्नं तं च वीरं महाकपिम् ॥ ३ ॥

स ता दृष्ट्वा महाबाहुर् महासत्त्वो महाबलः ।
चकार सुमहद् रूपं राक्षसीनां भयावहम् ॥ ४ ॥

ततस्तं गिरि सङ्काश मतिकायं महाबलम् ।
राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर् जनकात्मजाम् ॥ ५ ॥

कोऽयं कस्य कुतो वायं किं निमित्त मिहागतः ।
कथं त्वया सहानेन संवादः कृत इत्युत ॥ ६ ॥

आचक्ष्व नो विशालाक्षि मा भूत्ते सुभगे भयम् ।
संवादमसितापाङ्गे त्वया किं कृतवानयम् ॥ ७ ॥

अथाब्रवीत् तदा साध्वी सीता सर्वाङ्ग सुन्दरी ।
रक्षसां भीमरूपाणां विज्ञाने मम का गतिः ॥ ८ ॥

यूयमेवाभि जानीत योऽयं यद्वा करिष्यति ।
अहिरेव ह्यहेः पादान् विजानाति न संशयः ॥ ९ ॥

अहमप्यस्य भीताऽस्मि नैनं जानामि कोन्वयम् ।
वेद्मि राक्षस मेवैनं कामरूपिण मागतम् ॥ १० ॥

वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता दिशः ।
स्थिताः काश्चिद्गताः काश्चिद् रावणाय निवेदितुम् ॥ ११ ॥

रावणस्य समीपे तु राक्षस्यो विकृताननाः ।
विरूपं वानरं भीम माख्यातु मुपचक्रमुः ॥ १२ ॥

अशोक वनिका मध्ये राजन् भीम वपुः कपिः ।
सीतया कृत संवादस् तिष्ठत् यमित विक्रमः ॥ १३ ॥

न च तं जानकी सीता हरिं हरिण लोचना ।
अस्माभिर् बहुधा पृष्टा निवेदयितु मिच्छति ॥ १४ ॥

वासवस्य भवेद् दूतो दूतो वैश्रवणस्य वा ।
प्रेषितो वापि रामेण सीतान्वेषण काङ्क्षया ॥ १५ ॥

तेन त्वद्भुत रूपेण यत्तत् तव मनोहरम् ।
नाना मृग गणा कीर्णं प्रमृष्टं प्रमदावनम् ॥ १६ ॥

न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः ।
यत्र सा जानकी सीता स तेन न विनाशितः ॥ १७ ॥

जानकी रक्षणार्थं वा श्रमाद्वा नोपलक्ष्यते ।
अथवा कः श्रमस् तस्य सैव तेनाभि रक्षिता ॥ १८ ॥

चारु पल्लव पुष्पाढ्यं यं सीता स्वय मास्थिता ।
प्रवृद्धः शिंशुपा वृक्षः स च तेनाभिरक्षितः ॥ १९ ॥

तस्योग्ररूपस्योग्र त्वं दण्ड माज्ञातु मर्हसि ।
सीता सम्भाषिता येन तद्वनं च विनाशितम् ॥ २० ॥

मनःपरिगृहीतां तां तव रक्षो गणेश्वर ।
कः सीता मभि भाषेत यो न स्यात् त्यक्त जीवितः ॥ २१ ॥

राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः ।
हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥ २२ ॥

तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन् नास्र बिन्दवः ।
दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेह बिन्दवः ॥ २३ ॥

आत्मनः सदृशान् शूरान् किङ्करान्नाम राक्षसान् ।
व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥ २४ ॥

तेषामशीति साहस्रं किङ्कराणां तरस्विनाम् ।
निर्ययुर् भवनात् तस्मात् कूटमुद्गर पाणयः ॥ २५ ॥

महोदरा महादंष्ट्रा घोररूपा महाबलाः ।
युद्धाभि मनसः सर्वे हनुमद् गृहणोन्मुखाः ॥ २६ ॥

ते कपीन्द्रं समासाद्य तोरणस्थ मवस्थितम् ।
अभिपेतुर् महावेगाः पतङ्गा इव पावकम् ॥ २७ ॥

ते गदाभिर् विचित्राभिः परिघैः काञ्चनाङ्गदैः ।
आजघ्नुर् वानर श्रेष्ठं शरैश्चादित्य सन्निभैः ॥ २८ ॥

मुद्गरैः पट्टिशैः शूलैः प्रास तोमर शक्तिभिः ।
परिवार्य हनूमन्तं सहसा तस्थुरग्रतः ॥ २९ ॥

हनुमानपि तेजस्वी श्रीमान् पर्वत सन्निभः ।
क्षितावा विध्य लाङ्गूलं ननाद च महास्वनम् ॥ ३० ॥

स भूत्वा सुमहाकायो हनुमान् मारुतात्मजः ।
धृष्ट मास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ३१ ॥

तस्यास्फोटित शब्देन महता सानुनादिना ।
पेतुर् विहङ्गा गगना दुच्चैश् चेद मघोषयत् ॥ ३२ ॥

जयत् यतिबलो रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभि पालितः ॥ ३३ ॥

दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्ट कर्मणः ।
हनुमान् शत्रु सैन्यानां निहन्ता मारुतात्मजः ॥ ३४ ॥

न रावण सहस्रं मे युद्धे प्रतिबलं भवेत् ।
शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ ३५ ॥

अर्दयित्वा पुरीं लङ्का मभिवाद्य च मैथिलीम् ।
समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥ ३६ ॥

तस्य सन्नाद शब्देन तेऽभवन् भय शङ्किताः ।
ददृशुश्च हनूमन्तं सन्ध्यामेघ मिवोन्नतम् ॥ ३७ ॥

स्वामि सन्देश निःशङ्कास् ततस्ते राक्षसाः कपिम् ।
चित्रैः प्रहरणैर् भीमै रभिपेतुस् ततस् ततः ॥ ३८ ॥

स तैः परिवृतः शूरैः सर्वतः स महाबलः ।
आस सादायसं भीमं परिघं तोरणाश्रितम् ॥ ३९ ॥

स तं परिघमादाय जघान च निशाचरान् ।
स पन्नग मिवादाय स्फुरन्तं विनता सुतः ॥ ४० ॥

विचचाराम्बरे वीरः परिगृह्य च मारुतिः ।
सूदयामास वज्रेण दैत्यानिव सहस्र दृक् ।
स हत्वा राक्षसान् वीरान्  किङ्करान् मारुतात्मजः ॥ ४१ ॥

युद्धकाङ्क्षी पुनर्वीरस् तोरणं समुपाश्रितः ।
ततस् तस्माद् भयान् मुक्ताः कतिचित् तत्र राक्षसाः ।
निहतान् किङ्करान् सर्वान् रावणाय न्यवेदयन् ॥ ४२ ॥

स राक्षसानां निहतं महद्बलं
निशम्य राजा परिवृत्त लोचनः ।
समादिदेशा प्रतिमं पराक्रमे
प्रहस्त पुत्रं समरे सुदुर्जयम् ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥